ज्ञापं ज्ञापम्। आलोको दर्शनप्रेरणम्। निशाणं तिच्णीकरणम्। तोषणं तुष्टीकरणम्। ज्ञपयति शत्रुं शूरो मारयतीत्यर्थः। ज्ञपयति रूपं कामिनी षिड़्गान् दर्शयतीत्यर्थः। ज्ञपयति खड्गं कर्म्मकारः शाणयतीत्यर्थः। ज्ञपयति गुरुं शिष्यस्तोषयतीत्यर्थः। स्तुतिः केचिन्न मन्यते। आलोको ज्ञानप्रेरणमित्यनुन्यासरचितौ। अतएव क्रमदीश्वरोऽपि जानातेर्घटादित्वं विभाषया मन्यते। तेन ज्ञपयितुं बोधयितुमिच्छमाणो ज्ञीप्समान इति पाणिनीयवृत्तौ ज्ञानप्रेरणापि इस्वे सनि ज्ञीप्समान इति प्रसिद्धम्। एवं विज्ञप्तिरेषा मम जीववन्यौ इत्यादिषु च विज्ञापनमेवार्थः। इति दुर्गादासः॥

ज्ञा, ग बोधे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-अनिट्।) ग, जानाति। "सन्दर्भशुद्धिं गिरां जानीते जयदेव एवेत्यत्र अनुपसर्गात् फलवत्कर्त्तर्य्यात्मनेपदम्। ततोऽनुजज्ञे गमनं सुतस्य इत्यत्रानुशब्दस्योपसर्गं प्रतिरूपकत्वेनानुपसर्गत्वात्॥" इति दुर्गादासः॥

ज्ञातं, त्रि, (ज्ञायते विद्यते स्मेति। ज्ञा+कर्म्मणि क्तः।) अवज्ञानम्। जाना इति भाषा। तत्पर्य्यायः। विदितम् २ बुद्धम् ३ बुधितम् ४ प्रमितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८ मनितम् ९ अवसितम् १०। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। १। १२३।
"पूर्व्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा॥")

ज्ञातव्यं, त्रि, (ज्ञायते यदिति। ज्ञा+तव्य।) ज्ञानीयम्। ज्ञेयम्। वेद्यम्। अवगन्तव्यम्। बोध्यम्। (यथा, महाभारते। ४। २८। ५।
"स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः॥")
मन्तव्यम्। इति व्याकरणम्॥

ज्ञातसिद्धान्तः, पुं, (ज्ञातो विदितः सिद्धान्तः शास्त्रतत्त्वार्थो येन।) शास्त्रतत्त्वज्ञः। तत्पर्य्यायः। तान्त्रिकः २। इत्यमरः। ३।१।१५॥

ज्ञाता, [ऋ] त्रि, (ज्ञा+तृच्।) ज्ञानशीलः। तत्पर्य्यायः। विदुरः २ विन्दुः ३। इत्यमरः। ३। १। ३०॥ विदितः ४ ज्ञानसमन्वितः ५। इति शब्दरत्नावली॥

ज्ञातिः, पुं, जानाति छिद्रं कुलस्थितिञ्च ज्ञातिः नाम्नीति तिक्। इत्यमरटीकायां भरतः॥ सपिण्डादिः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ बन्धुः ४ स्वः ५ स्वजनः ६। इत्यमरः। २।६।३४॥ अंशकः ७ गन्धः ८ दायादः ९। इति त्रिकाण्डशेषः॥ सकुल्यः १० समानोदकः ११। इति जटाधरः॥ स चतुर्विधः। सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततस्त्रिपुरुषपर्य्यन्तं सकुल्यः। ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकः। जन्मनामस्मृतिपर्य्यन्तमपि समानोदकः। ततः परं गोत्रजः। इति शुद्धितत्त्वम्॥ एषां विशेषस्तत्तच्छब्दे द्रष्टव्यः॥*॥ ज्ञातिद्रोहे दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोड़शीम्॥"

(ज्ञायते विद्यतेऽस्मादिति। ज्ञा+अपादाने क्तिन्।) पिता। इति मेदिनी। ते, २०॥

ज्ञातेयं, क्ली, (ज्ञातेर्भावः कर्म्म वा। ज्ञाति+"कपिज्ञात्योर्ढक्।" ५। १। १२७। इति ढक्।) ज्ञातित्वम्। इत्यमरः। २। ६। ३५॥

ज्ञानं, क्ली, (ज्ञा+भावे ल्युट्।) विशेषेण सामान्येन चावबोधः॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।"
इत्यमरः। १। ५। ६॥
अस्यार्थः। "मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः। अन्यच्च घटपटादौ या धीः सापि ज्ञानं विज्ञानञ्चोच्यते एषा सामान्यप्रवृत्तिः। मोक्षे धीर्ज्ञानं विज्ञानञ्च यथा ज्ञानान्मुक्तिरिति सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति। अन्यत्र यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति घटत्वप्रकारकज्ञानमिति ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मताः इति। ब्रह्मणो नित्यविज्ञानानन्दरूपत्वादिति एवं चित्रज्ञानं व्याकरणज्ञानं घटपटविज्ञानमित्यादिकं प्रयुज्यत एव। मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित्। मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्विज्ञानं क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित्। अवबोध इत्यध्याहृत्य मोक्षविषये अवबोधो धीः अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित्।" इति भरतः॥ * ॥ योगशास्त्रमते तु।
"एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वशः।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम्॥"
इति मोक्षधर्म्मः॥
"एकत्वं बुद्धिमात्रेणावस्थानं बुद्धिवृत्तिनिरोध इति यावत्।" इति तट्टीका॥ * ॥
"अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम्।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥"
सात्त्विकराजसतामसभेदेन तत्त्रिविधम्।
सात्त्विकं यथा,—
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥"
राजसं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥"

तामसं यथा,—
"यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥" ३॥
इति श्रीभगवद्गीतायाम्। १८। २०—२२॥
"सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतं एकमव्ययं निर्व्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्त्विकं विद्धि॥ १॥
सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखिदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि॥ २॥
एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तं एतावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुकं निरुपपत्तिकं अतत्त्वार्थवत् परमार्थालम्बनशून्यं अतएवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम्॥" ३॥
इति तट्टीकायां श्रीधरस्वामी॥
न्यायमते तु।
"अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे आत्मबुद्धिः शङ्खादौ पीतिमा मतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते।
किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः।
तदभावाप्रकारा धीस्तत्प्रकारा तु निर्णयः॥
स संशयो भवेद्या धीरेकत्राभावभावयोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः॥"
"गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यज्ज्ञानं तद्वत् विशेष्यकम्॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम्॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्॥"
इति भाषापरिच्छेदः॥
(यथा, वायुपुराणे उत्तरभागे। ११। ३६।
"वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते।
योगज्ञः पतितो वापि मुच्यते नात्र संशयः॥"
विष्णुः। यथा महाभारते। १३।१४९।६१।
"सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम्॥"
"ज्ञानं प्रकृष्टमजन्यमनवच्छिन्नं सर्व्वस्य साधकमिति ज्ञानमुत्तमं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः॥" इति तद्भाष्यम्॥)

ज्ञानदर्पणः, पुं, (ज्ञानं दर्पण इव यस्य।) पूर्व्वजिनः। इति त्रिकाण्डशेषः।

ज्ञानयोगः, पुं, (युज्यते ब्रह्मणानेनेति। युज+करणे घञ्। ज्ञानमेव योगः।) ब्रह्मज्ञानप्राप्त्युपायः। यथा,—
"सर्व्वभूतेषु गोविन्दो बहुरूपो व्यवस्थितः।
इति मत्वा महाप्राज्ञः प्रतिकूलं न कारयेत्॥